दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् मार्गशीर्षकृष्णामावस्या
मार्गशीर्षः ५ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-29 | 1 | नवम्बर, 20 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलप्रदेशस्य सर्वकारस्य विरुद्धं 4 दिसम्बर दिनाङ्के। धर्मशालायाः जोरावरप्राङ्गणे भाजपायाः विरोधप्रदर्शम्

3 केन्द्रसर्वकारेण देशे सर्वत्र ११ कोटि-शौचालयानां निर्माणं कृतम्- आवास-नगर-कार्यमन्त्री मनोहरलालः

4 इन्दिरा प्रियदर्शिनी गान्धी (१९१७-१९९३) प्रयागे जाता ।

## सुभाषितम्

**एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा।।**
**विद्यैका परमा दृष्टिर-हिंसैका सुखावहा।।**

भावार्थ- अकेले धर्माचरण से ही परम मोक्ष प्राप्त होता है और अकेले क्षमाशीलता से सर्वोत्तम शान्ति प्राप्त होती है। विद्या प्राप्त करने से सर्वोत्तम ज्ञान और विवेक प्राप्त होता है तथा अहिंसा का अनुपालन करने से सुख प्राप्त होता है।

# प्रधानमन्त्री नरेन्द्रमोदी तमिलनाडु-राज्यस्य कोयम्बत्तूर-नगरे पी. एम-किसान-योजनायाः एकविंशतितमं देय मूल्यानि लोकार्पितवान्




**हिमसंस्कृतवार्ताः -** प्रधानमन्त्री नरेन्द्रमोदी तमिलनाडु-राज्यस्य कोयम्बत्तूर-नगरे पी. एम-किसान-योजनायाः एकविंशतितमं देय मूल्यानि लोकार्पितवान्। सम्पूर्ण देशे नवकोटि-कृषकान् समर्थनाय प्रायः अष्टादशसहस्रकोटिरूप्यकाणि प्रदत्तानि । प्रधानमन्त्री कोयम्बत्तूर-नगरे दक्षिण-भारत-प्राकृतिक-कृषि-शिखरसम्मेलने भागं भजितवान्। अस्मिन् अवसरे श्रीमोदी अवदत् यत्, विगतैकादश-वर्षेषु कृषिक्षेत्रे परिवर्तनात्मकानि परिष्काराणि दृष्टानि सन्ति। सः अवदत् यत्, देशः प्राकृतिककृपे वैश्विककेन्द्रं भवति तथा च तस्य जैवविविधता नूतनं स्वरूपं गृह्णाति। सः अवदत् यत्, कृषि-निर्यातः द्विगुणितः अभवत्, तथा च सर्वकारेण कृषि-पद्धत्यां आधुनिकीकरणाय नैके उपायाः कृताः सन्ति।

### कृषि-निर्यातः द्विगुणितः अभवत् - प्रधानमंत्री

प्रधानमंत्री अवदत् यत्, कृषकाः किसान्-क्रेडिट्-काई इत्यनेन माध्यमेन दश लक्ष-कोटिरूप्यकाणां लाभान् प्राप्तवन्तः। प्रधानमन्त्री सूचितवान् यत् देशस्य यूनः अधुना कृषिकार्य आधुनिक, व्यापकावसर-रूपेण पश्यन्ति । सः अवधानं दत्तवान् यत् विकसितभारतस्य कृते भविष्यकालिककृषि-व्यवस्थायाः निर्माणाय समन्वितप्रयासानां आवश्यकता वर्तते इति। केन्द्रीय-सूचना-प्रसारण-राज्यमन्त्री डा. एल्. मुरुगन् वर्यः उक्तवान् यत्, तमिलनाडुराज्यस्य द्वाविंशतिलक्षं यावत् कृषकाः पी. एम्. किसान् सम्मान् निधि-योजनया लाभं प्राप्तवन्तः। कार्यक्रमस्य समये प्रधानमन्त्रिणा कृषकैः सह संवादः अपि साधितः।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## डिजिटल् इण्डिया इति एकं परिवर्तनशीलम् उपक्रमः - राष्ट्रपतिः द्रौपदीमुर्मूः



**हिमसंस्कृतवार्ताः -** राष्ट्रपतिः द्रौपदीमुर्मुः वर्या प्रोक्तवती यत् डिजिटल् इण्डिया इति एकं परिवर्तनशीलम् उपक्रमः अस्ति येन प्रौद्योगिकीं नागरिकानां समीपे आनीय विभिन्नावसराणां द्वाराणि उद्घाटितानि। नवदेहल्यां राष्ट्रिय-प्रौद्योगिकी संस्थानस्य पञ्चमं वार्षिक-दीक्षान्त-समारोहं सम्बोधयन् सा अवदत् यत् समानावसराः प्रदानाय द्रुत-अन्तर्जाल-सेवा, नवीनतम-प्रौद्योगिकी च दूरस्थेषु क्षेत्रेषु संस्थापिताः सन्ति। सा अवोचत् यत् एन्. आई. टि. सदृशाः संस्थाः माडेल्-डिजिटल्-ग्रामाणां निर्माणे महत्त्वपूर्णां भूमिकां निर्वहितुं शक्नुवन्ति, अपि च छात्रान् नूतनदिशि चिन्तयितुं प्रयतयितुं च प्रोक्तवती ।

## जनतादलस्य नेता नितीशकुमारः अद्य बिहारस्य मुख्यमन्त्रीरूपेण शपथग्रहणं करिष्यति



**हिमसंस्कृतवार्ताः -** बिहार-राज्ये जनता दल (युनाईटेड) दलस्य प्रमुखः तथा राज्यस्य दीर्घकालं यावत् मुख्यमन्त्रीषु अन्यतमः नितीश कुमारः राज्ये राष्ट्रिय जनतांत्रिक गठबन्धनस्य (एन्. डी. ए.) पक्षस्य विधायक दलस्य नेता निर्वाचितः। पटना-नगरे घटबन्धनस्य घटकदलानां संयुक्तसभायां अयं निर्णयः स्वीकृतः। सद्य एव आयोजिते राज्यविधानसभानिर्वाचने एन्. डी. ए. पक्षेण त्रिचत्वारिंशोत्तर द्विशतं यावत् सदस्यात्मिकायां बिहारविधानसभायां द्वयाधिक द्विशतासनानि प्राप्य पुनः अधिकारः अधिगतम्। भाजपेति दलस्य नेता साम्राट् चौधरी पक्ष-विधानमण्डलस्य नेता निर्वाचितः, विजयसिन्हा उपनेता निर्वाचितः। एन्. डी. ए- पक्षस्य उपवेशनानन्तरं मुख्यमन्त्री नितीशकुमारः राज्यपालाय स्व त्यागपत्रं प्रदत्तवान्, नूतनसर्वकारं निर्माणाय प्रस्तावोपि प्रदत्तवान्। जनतादल (युनाईटेड) दलस्य नेता नितीशकुमारः अद्य दशंवारं बिहारस्य मुख्यमन्त्रीरूपेण शपथ ग्रहणं करिष्यति। शपथग्रहण-समारोहः पटना-नगरस्य ऐतिहासिके गान्धी-मैदान-क्षेत्रे भविष्यति। अस्मिन् कार्यक्रमे प्रधानमन्त्रिणा नरेन्द्रमोदिना सह अन्येपि जनाः उपस्थिताः भविष्यन्ति ।

# काङ्ग्रेसः निर्वाचनायोगस्य चरित्रं कलङ्कयति, २७२ सेवानिवृत्ताः न्यायाधीशाः, अधिकारिणः च राहुलगान्धिनः विरुद्धं पत्रं लिखितवन्तः

हिमसंस्कृतवार्ताः। भारतीयनिर्वाचनायोगस्य विरुद्धं काङ्ग्रेससांसदराहुलगान्धीं लक्ष्यं कृत्वा आरोपानाम् विषये पूर्वभारतीयन्यायाधीशाः पूर्वाधिकारिणः च स्वस्य खिन्नतां प्रकटितवन्तः। २७२ पूर्वन्यायाधीशैः पूर्वाधिकारिभिः च लिखिते मुक्तपत्रे राजनैतिककुण्ठां गोपनार्थं संस्थानां लक्ष्यं क्रियते इति उक्तम्। काङ्ग्रेसेन निर्वाचनायोगेन भारतीयजनतापक्षेण सह सहयोगः कृता इति आरोपः कृतः आसीत् । पत्रे उक्तं यत्, "समाजस्य वरिष्ठनागरिकाः वयं चिन्ताम् प्रकटयामः यत् भारतस्य लोकतन्त्रस्य उपरि आक्रमणं क्रियते।



एषः आक्रमणः बलेन न, अपितु तस्य संस्थानां प्रति विषयुक्तवाक्पटुतायाः माध्यमेन क्रियते। केचन राजनेतारः स्वस्य नाटकीयराजनैतिकरणनीत्याः भागरूपेण उत्तेजनानां, निराधारानाम् आरोपानाम् आश्रयं गृह्णन्ति, यथा वास्तविकनीतिविकल्पं न प्रदास्यन्ति। पत्रे हस्ताक्षरं कृतवन्तः २७२ जनाः १६ सेवानिवृत्ताः न्यायाधीशाः, १२३ पूर्वाधिकारिणः, १३३ सेवानिवृत्ताः सैन्यपदाधिकारिणः, १४ पूर्वराजदूताः च सन्ति पत्रे उक्तं यत् भारतीयसशस्त्रसेनानां साहसं उपलब्धिषु च प्रश्नं कृत्वा, न्यायपालिकायाः निष्पक्षतायाः विषये प्रश्नं कृत्वा, संसदं तस्याः अधिकारिषु च प्रश्नं कृत्वा, अधुना भारतस्य निर्वाचनआयोगस्य षड्यन्त्रम् अस्ति

# हिमाचलप्रदेशस्य सर्वकारस्य विरुद्धं 4 दिसम्बर दिनाङ्के। धर्मशालायाः जोरावरप्राङ्गणे भाजपायाः विरोधप्रदर्शम्



हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, शिमला। तपोवनस्थे प्रस्ताविते हिमाचल- विधानसभा- शीतकालीन- अधिवेशने 4 दिसम्बर दिने भाजपा दलं सर्वकारस्य विरुद्धं प्रदर्शनं करिष्यति। बुधवासरे शिमलानगरे आयोजिते पत्रकारसम्मेलने भाजपा-प्रदेशाध्यक्षः डॉ. बिन्दलः तथा विपक्षनेता जयरामठाकुरः एतत् सूचितवन्तौ। प्रदर्शनं धर्मशालायाः जोरावरप्राङ्गणे भविष्यति। उभौ उक्तवन्तौ यत्- बिहार-निर्वाचने कांग्रेस-पक्षस्य या दुरावस्था जाताऽस्ति, तां सर्वे जनाः पश्यन्ति। हिमाचलस्य कांग्रेससर्वकारः निर्वाचन- परिणामानन्तरं मूर्च्छितावस्थां प्राप्नोत्। डॉ. राजीवबिन्दलः अवदत् यत्- वर्तमान कांग्रेस- सर्वकारः 11 दिसम्बर दिने स्वस्य कार्यकालस्य त्रिवर्षाणां सम्पूर्तौ उत्सवेन आचरिष्यति। एषा सर्वकारः अद्यावधि सर्वथा निकृष्टा। कांग्रेस- सर्वकारस्य त्रीणि वर्षाणि युव-अनुद्योगिनां विनाशस्य, माफिया-राज्यम्, संस्थापनानां तालाबन्दी, वर्द्धमानं ऋणम्, असत्य-प्रतिज्ञानाम् इत्येतासाम् उपलब्धिनां सन्ति। अस्य सर्वकारस्य सत्ता-स्थितिं प्रति अधिकारः नास्ति।

## हिमाचल-निर्वाचने कांग्रेसम् "ऑल्टो" कारमध्ये स्थापयिष्यामः – जयरामठाकुरः

विपक्षनेता जयरामठाकुरः अवदत्- सर्वकारस्य त्रिवर्षीय- उत्सवः कस्मै अपि रोचमानः नास्ति। प्रदेशः अद्य आपद्-अवस्थायाम् वर्तते, राज्ये आपदा-प्रबन्धन- अधिनियमः प्रवर्तते। तस्य आडम्बरेण पञ्चायत-निर्वाचनानि स्थगयितुं यत्नः क्रियते, तथापि सर्वकारः उत्सवं कर्तुम् इच्छति।बिहारनिर्वाचने कांग्रेसपक्षः एकस्मिन् बोलेरो-वाहने उपयोजनीयः अभवत् इति तेनोक्तम्। हिमाचल- निर्वाचने तु तान् “ऑल्टो” वाहनमध्ये अपि स्थापयिष्यामः। ऑल्टो-वाहनं मुख्यमन्त्रिणः अपि प्रियतमं वाहनं इति तेन सूचितम्।

# प्रधानमंत्री नरेन्द्रमोदी आन्ध्रप्रदेशस्य पुट्टपर्थी-नगरे भगवतः श्री सत्यसाईं बाबा-वर्यस्य शतवार्षिक- जन्मोत्सवे भागं भजितवान्



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् सर्वकारेण चतुर्दशाधिक द्विसहस्रतमे वर्षे पञ्चविंशति कोटिजनानां सामाजिकसुरक्षाव्यवस्था अधुना प्रायः शतकोटिजनानां कृते विस्तृता। आन्ध्रप्रदेशस्य पुट्टपर्थी-नगरे भगवतः श्री सत्यसाई बाबा-वर्यस्य शतवार्षिक-जन्मोत्सवे भागम् अगृह्णन् जनसमूहं सम्बोधयन् प्रधानमन्त्री, स्थानीयस्तरे निर्मितानां उत्पादानां क्रयणेन, स्थानीय-अर्थव्यवस्थां सुदृढं कृत्वा, वोकल्-फ़ार्-लोकल् इति उपक्रमस्य समर्थनाय जनान् आवाहयत्। प्रधानमंत्रीः अवदत् यत्, सम्पूर्ण देशे, अधुना पर्यन्तं प्रायः चतस्रः कोट्यधिकाः एतादृशाः बैंक लेखाः उद्घाटिताः सन्ति, यासु प्रायः पञ्चदशमलवोत्तर त्रीणि लक्ष कोटिरूप्यकाणि सञ्चिताः सन्ति, यत् बालिकाभ्यः वर्धमान-वित्तीय-सुरक्षां प्रतिबिम्बयति। सः अवोचत् यत् यद्यपि श्रीसत्यसाई बाबा भौतिकरूपेण उपस्थितः नास्ति तथापि तस्य प्रेमस्य, सेवायाः, विश्वभ्रातृत्वस्य च शाश्वतसिद्धान्ताः सम्पूर्ण विश्वे कोटिशः जनानां निरन्तरं मार्गदर्शनं कुर्वन्ति। शतवार्षिकोत्सवे, सः भगवतः श्रीसत्यसायि बाबा वर्यस्य जीवनस्य, उपदेशस्य, चिरस्थायीपरम्परायाः च सम्माने शतरुप्यकैः मुद्रा पैष्यचिटीकायाः च विमोचनं मुख्यमन्त्रिणा एन. चन्द्रबाबु नायडु वर्येण सह कृतवान्। पूर्वदिने प्रधानमन्त्रिणा प्रशान्ति निलयम् इत्यस्मिन् महा-समाधौ विशेषार्चना कृता।

# अस्मिन् विधानसभासत्रे पुलिसाधीक्षकः न अपि तु उपपुलिसमहानिरीक्षकः (DIG) सुरक्षादायित्वं सम्पादयिष्यति



## सुरक्षा अधिका कठिना भविष्यति, वासगृहाणान सीमाक्षेत्राणां च निकटतया निरीक्षणं भविष्यति

हिमसंस्कृतवार्ताः - धर्मशाला। अद्यत्वे दिल्लीनगरे बम्बविस्फोटस्य अनन्तरं सुरक्षायाः अधिकं सुदृढीकरणं क्रियते। परिवर्तितायाः परिस्थित्याः कारणात् हिमाचलप्रदेशस्य अन्तः सुरक्षासंस्थाः स्वसुरक्षारणनीतिषु महत्त्वपूर्णरूपेण परिवर्तनं कृतवन्तः। नवम्बर २६ दिनाङ्कात् आरभ्य धर्मशालानगरस्य तपोवने निश्चितस्य विधानसभासत्रस्य विशेषतया सज्जता कृता अस्ति। धर्मशालायां शिशिरसत्रस्य कृते विभिन्नस्तरेषु सुरक्षाव्यवस्थाः सुदृढाः कृताः सन्ति। अस्मिन् समये पुलिसाधीक्षकस्य स्थाने, सत्रस्य समये सुरक्षायाः दायित्वं उपपुलिसमहानिरीक्षकः (डीआइजी) इत्यस्मै दत्तम्। हिमाचलप्रदेशस्य पञ्जाब- उत्तराखण्ड-जम्मूकश्मीरप्रदेशानां सीमानः सन्ति। एतेषु सीमाक्षेत्रेषु सुरक्षाबलानाम् परीक्षणं, परिनियोजनं च पूर्वमेव वर्धितम् अस्ति। सर्वेषु प्रमुखेषु मार्गेषु, नाकास्थानेषु च नियमितरूपेण वाहनानां निरीक्षणं क्रियते। वाहनपरीक्षायाः अतिरिक्तं शङ्कितानां कार्याणां निरीक्षणमपि क्रियते। धर्मशालायां तत्समीपस्थेषु च सुरक्षाबलानां नियोजने अपि पूर्वकालस्य तुलनायां परिवर्तनं क्रियते। धार्मिकराजनैतिकस्थलेषु अपि पुलिसदलानि सतत् निरीक्षणं कुर्वन्ति। धर्मशालायां होटलेषु, अतिथिगृहेषु च शिशिरसत्रे निवसतां विधायकानाम्, अधिकारिणां, अन्येषां च प्रतिनिधिनां सुरक्षा सुनिश्चिता भवति। पुलिस-गुप्तचरसंस्थाभिः होटल- अतिथिगृहेषु नियमितपरीक्षा आरब्धा, शङ्कितानां क्रियाकलापानाम् अभिज्ञानार्थं च कर्मचारिणः विशेषप्रशिक्षणं प्राप्नुवन्ति अपि च होटलपञ्जिकायां प्रत्येकस्य व्यक्तेः नाम, परिचयस्य च अभिलेखनस्य प्रक्रिया कठोररूपेण प्रवर्तिता अस्ति।

## शङ्कितानां व्यक्तिनां क्रियाकलापानाञ्च निकटतया निरीक्षणं क्रियते

दिल्लीबमविस्फोटस्य अनन्तरं राज्यगुप्तचरविभागेन अपि निरीक्षणं वर्धितम् अस्ति। अस्य अन्तर्गतं शङ्कितानां व्यक्तिनां क्रियाकलापानाञ्च निकटतया निरीक्षणं क्रियते। शङ्कितानां तत्त्वानां परिचयाय शिमला- धर्मशाला- नगरयोः गुप्तचरसंस्थाः सक्रियरूपेण सूचनानां संग्रहणं कुर्वन्ति। अपि च, राज्यपुलिसस्य केन्द्रीयसंस्थानां च मध्ये समन्वयः वर्धितः यत् सम्भाव्यमानानां संकटानां शीघ्रं निवारणं कर्तुं शक्यते। सत्रे सीसीटीवी, ड्रोन प्रौद्योगिक्याः अपि उपयोगः भवितुं शक्नोति।

# अन्तर्जालरहितां सत्यापनव्यवस्थां सुदृढं कर्तुं भारतस्य विशिष्टपरिचयप्राधिकरणं आधार एप् इत्यस्य प्रारम्भं करिष्यति

AADHAAR
UIDAI

अफलाइनसत्यापनव्यवस्थां सुदृढं कर्तुं भारतस्य विशिष्टपरिचयप्राधिकरणं आधार एप् इत्यस्य प्रारम्भं करिष्यति। इलेक्ट्रॉनिक्स-सूचना-प्रौद्योगिकी-मन्त्रालयेन उक्तं यत् आधार-एप्-द्वारा कर्गदरहित-परिचय-सहयोगस्य-सौविध्यं भविष्यति, येन आधार-सर्व-सूचनाः अथवा चयनित-सूचनाः सत्यापयितुं सार्वजनिकं च कर्तुं च विकल्पः प्राप्यते। एप् इत्यस्य औपचारिकप्रक्षेपणात् पूर्वं यूआईडीएआई इत्यनेन आधार एप् इत्यस्य उपयोगेन अफलाइनसत्यापनविषये सूचनाप्रदं अन्तर्जालीयसंगोष्ठी आयोजिता। अन्तर्जालीयसंगोष्ठ्याः कालखण्डे प्रतिभागिभ्यः अफलाइनसत्यापनस्य लाभस्य विषये परिचयं कारितम्, यथा सर्वाणि वा चयनितानि आधारसूचनाः सत्यापयितुं सार्वजनिकं कर्तुं च विकल्पः तथा च अफलाइनमुखसत्यापनद्वारा उपस्थितेः प्रमाणस्य सत्यापनस्य क्षमता इति विषये प्रतिपादितम्। यूआईडीएआई-सङ्घस्य मुख्यकार्यकारी भुवनेशकुमारः अवदत् यत् अस्य उद्देश्यं देशे सर्वत्र अफलाइनसत्यापनपारिस्थितिकीतन्त्रं वर्धयितुं, सौविध्यपरिष्कारं कर्तुं, सुरक्षितानि डिजिटलपरिचयसेवां सुदृढां कर्तुं च अस्ति।

# मुख्यमंत्री सुक्खुः दूनविधानसभानिर्वाचनक्षेत्रे ३८३ कोटिरुप्यकाणां परियोजनानाम् उद्घाटनानि शिलान्यासान् चाकरोत्



**हिमसंस्कृतवार्ताः- सोलनम्।** सोलनजनपदस्य दूनविधानसभानिर्वाचनक्षेत्रे एकदिवसीये प्रवासे मुख्यमंत्री सुखविन्दरसिंहसुक्खुः ३८३ कोटिरूप्यकाणां द्वादशविकासात्मक- परियोजनानाम् उद्घाटनानि शिलान्यासान् चाकरोत्। सः ८६ रुप्यकाणां व्ययेन निर्मितस्य बद्दी- साई- रामशहरमार्गस्य उद्घाटनं कृतवान्। दूनक्षेत्रे १५.७८ कोटिरूप्यकाणां व्ययेन निर्मितं ट्यूबवेल्स इत्यस्य, बद्दीनगरे १०.६४ कोटिरूप्यकाणां व्ययेन नवनिर्मितस्य नागरिक- चिकित्सालयस्य, ३.१५ कोटिरूप्यकाणां व्ययेन निर्मितस्य बरोटीवालायां नवनिर्मितस्य सामुदायिक- स्वास्थ्यकेन्द्रस्य उद्घाटनमपि कृतवान्। असौ शिक्षाखण्ड बद्दी इत्यस्य अन्तर्गतं हरिपुरसण्डौली, सूरज माजरा, लबाना, चक्कां इत्यत्र च नवनिर्मितानां सर्वकारीय- प्राथमिक- विद्यालयानाम् अपि उद्घाटनं कृतवान्। मुख्यमन्त्री बद्दी ७३.२१ कोटिरूप्यकाणां व्ययेन निर्मीयमाणस्य गुणवत्ता- विश्वसनीयविद्युत्- आपूर्तियोजनायाः, ६३.७३ कोटिरूप्यकाणां व्ययेन बद्दी- शीतलपुर- जगतखाना- मार्गस्य निर्माणस्य, ३३ कोटिरूप्यकाणां व्ययेन निर्मीयमाणस्य अतर्राज्यीयबसस्थानकस्य बद्दी इत्यस्य, ३७.६७ कोटिरूप्यकाणां व्ययेन, लघुसचिवालयभवनस्य शेषक्षेत्राणां कृते ३७.१० कोटिरूप्यकाणां व्ययेन मलनिकासीयोजनायाः निर्माणस्य, कल्याणपुरे ५ कोटिरूप्यकाणां व्ययेन राजीवगान्धी- दिवस- बोर्डिंग- विद्यालयस्य निर्माणस्य च आधारशिलाः अस्थापयत्।

# "इन्दिरागान्धी इत्यस्याः कारणात् पाकिस्तानदेशः आत्मसमर्पणं कर्तुं बाध्यः अभवत्"- प्रतिभा सिंह



**हिमसंस्कृतवार्ताः- शिमला।** पूर्वप्रधानमन्त्री इन्दिरागान्धी इत्यस्याः राजनैतिककुशलता परिपक्वता च पाकिस्तानस्य भारतस्य समक्षं आत्मसमर्पणं कर्तुं बाध्यं कृतवती। पूर्णराज्यत्वं प्रदातुं हिमाचलप्रदेशस्य विकासाय च इन्दिरागान्धी इत्यस्याः योगदानं कदापि न विस्मर्तुं शक्यते। एतत् राज्यस्य काङ्ग्रेसस्य मुख्यालये राजीवभवने स्वर्गीय इन्दिरागान्धी इत्यस्याः जन्मदिवसे पार्टीप्रदेशाध्यक्षा प्रतिभासिंहद्वारा उक्तम्। प्रतिभा उक्तवती यत् देशस्य पुनर्निर्माणे इन्दिरागान्धी इत्यस्याः महत्त्वपूर्णं योगदानम् अस्ति। इन्दिरा गान्धी एव लाहौल- स्पीति- जनानाम् आग्रहेण रोहताङ्ग- आन्तर्भौमिकमार्गस्य निर्माणाय अनुमोदनं कृतवती। पण्डितनेहरू इत्यस्य अनन्तरं इन्दिरा इत्यस्याः अपि राज्यं प्रति अगाधः स्नेहः आसीत्। अद्यत्वेऽपि गान्धीपरिवारस्य सदस्याः सोनियागान्धी, राहुलगान्धी, प्रियंकागान्धी च राज्यं प्रति समानं स्नेहं धारयन्ति। प्रतिभा अवदत् यत् राज्यस्य प्रथमस्य मुख्यमन्त्रिणः स्वर्गीयस्य डॉ. यशवंतसिंहपरमारस्य प्रयत्नेन हिमाचलप्रदेशः पूर्णराज्यत्वं प्राप्तवान्। तदनन्तरं षट् कार्यकालं मुख्यमन्त्रीरूपेण कार्यं कृतवान् स्वर्गीयः वीरभद्रसिंहः अपि आधुनिकहिमाचलस्य विकासे महत्त्वपूर्णां भूमिकां निर्वहति स्म। तत्कालीनजनसंघः (अद्यतनस्य भाजपा) हिमाचलस्य पूर्णराज्यत्वं दातुं विरोधं कृत्वा "स्टेटहुड को मारो ठुड" इति घोषम् अयच्छत्। भाजपा कदापि राज्यस्य शुभचिन्तकः न अभवत्। काङ्ग्रेसपक्षः सर्वदा देशस्य राज्यस्य च विकासाय प्राथमिकताम् अददत्, अग्रे अपि करिष्यति। प्रतिभा दलनेतृभ्यः कार्यकर्तृभ्यः च आह्वानं कृतवती यत् ते इन्दिरा गान्धी इत्यनया दर्शितं मार्गं अनुसृत्य देशस्य एकतायाः अखण्डतायै च एकीकृतरूपेण कार्यं कुर्वन्तु।

# वार्ता-संवादः

नियमित-स्वास्थ्य-परीक्षणं कर्तव्यम् इति अनेन स्मारितम्।



**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य प्रथमा वार्ता चिकित्सा-क्षेत्रात् आगता। शोध-शामकेन एकेन अल्पमूल्येन गुटिका-विशेषेण हृदयाघातस्य मस्तिष्क-आघातस्य च आशङ्का न्यूनीकर्तुम् शक्नोति इति विज्ञान-पत्रिकया सूचितम्।

**नन्दिनी-** आम्, शोभनं वृत्तमिदम्। अनेन बहूनाम् उपकारः स्यात्। अधुना अपरा वार्ता। मानवेषु कृतया प्रथमया चिकित्सकीय-परीक्षया ज्ञातं यत् प्रौढ-मूल-कोशिकानां प्रयोगेण नष्टां दृष्टिं पुनः प्राप्तुं शक्यते।

**काव्या-** अहो, एतत् तु महद् आश्चर्यम्। यदि एतत् सत्यं भवेत् तर्हि अन्धानां जीवने महान् प्रकाशः आनीतः स्यात्। अग्रिमा वार्ता का?

**नन्दिनी-** सत्यम्, एषा महती आशा। भविष्ये किं भवति इति द्रक्ष्यामः। इदानीम् एका चिन्ताजनिका वार्ता अपि श्रुता। एकेन नवीनेन अध्ययनेन प्रकाशितं यत् उच्च-रक्तचापेन मस्तिष्कस्य हानिः रक्तचाप-वृद्धेः पूर्वमेव आरब्धा भवति।

**काव्या-** किम्? रक्तचाप-वृद्धेः पूर्वमेव? एतत् तु महद् भयस्य कारणम्, यतः जनाः लक्षणैः विना रोगं न जानन्ति। सर्वेषां


**नन्दिनी-** आम्, चिन्तया अलम्। इदानीं किञ्चित् भिन्नं मनोरञ्जकं च वृत्तं श्रूयताम्। इदानीम् एकेन लेखेन प्रकाशितं यत् चुम्बनस्य व्यवहारः प्रायः द्विकोटि-वर्षेभ्यः पूर्वम् अस्माकं कपि-पूर्वजैः पश्चादुषोमानवैः च आरब्धः अभूत्।

**काव्या-** द्विकोटि-वर्षेभ्यः पूर्वम्? एषः तु अतीव दीर्घः कालः! महद् कौतुकम् अनेन वृत्तेन मम मनसि जातम्। प्राचीनाः मानवाः अपि स्नेहं प्रदर्शयितुं चुम्बनस्य प्रयोगं कृतवन्तः इति ज्ञातम्।

**नन्दिनी-** सत्यम्, इतिहासः सर्वदैव रोचकः। एताः अद्यतनीयाः मुख्याः वार्ताः आसन्। अद्यतनस्य कार्यक्रमस्य समाप्तिः अत्रैव क्रियते। धन्यवादः।

**काव्या-** धन्यवादः नन्दिनि। सर्वेभ्यः श्रोतृभ्यः शुभमस्तु। पुनर्मिलामः।

# केन्द्रसर्वकारेण देशे सर्वत्र ११ कोटि-शौचालयानां निर्माणं कृतम्-आवास-नगर-कार्यमन्त्री मनोहरलालः



हिमसंस्कृतवार्ताः। आवास-नगर-कार्यमन्त्री मनोहरलालः स्वच्छभारत-अभियानस्यन्तर्गतं स्वच्छता-विषये देशस्य विलक्षण-प्रगतेः प्रकाशनं कृत्वा देशे सर्वत्र ११ कोटि-शौचालयानां निर्माणं कृतम् इति उक्तवान्। विश्वशौचालयदिवसस्य अवसरे नवदिल्लीनगरे त्रिदिवसीयविश्वशौचालय- शिखरसम्मेलनस्य उद्घाटनसमारोहं सम्बोधयन् मन्त्री उक्तवान् यत् शौचालयनिर्माणं महत्त्वपूर्णं कीर्तिमानम् अस्ति यत् ग्रामीणे नगरीयभारते च जनस्वास्थ्यं गौरवं च परिवर्तयति। सः अवदत् यत् २०१९ तमे वर्षे सर्वे ग्रामाः,जनपदाः, राज्याः च मुक्तशौचमुक्ताः (ODF) इति घोषिताः । मनोहरलालमहोदयेन अपि उक्तं यत् अधुना सर्वकारः देशं ओडीएफ प्लस् इति करणाय केन्द्रितः अस्ति। स्वच्छता-अभियानेन स्वच्छतायाः विषये जनानां व्यवहारे परिवर्तनं जातम् इति सः अवदत् । आयोजनस्य कालखण्डे आवास- नगरीयकार्याणि मन्त्रालयेन उत्तरदायी शौचालयस्य उपयोगस्य प्रवर्धनार्थं वर्षव्यापी "शौचालय पास् है" "मैं साफ ही अच्छा हूं" इति अभियाने अपि प्रारब्धे। मन्त्रालयेन उक्तं यत् एतयोः अभियानानयोः उद्देश्यं समुदायेषु उत्तरदायी शौचालयस्य उपयोगं स्वच्छतायाः प्रवृत्तिं च प्रवर्तयितुं वर्तते। मन्त्रालयेन "स्वच्छाभ्यासाः" इति २१ दिवसीयः पाठ्यक्रमः अपि आरब्धः यत् बालकेषु बाल्यकालात् एव उत्तमस्वच्छतायाः प्रवृत्यः प्रवर्तयितुं शक्यन्ते । अस्मिन् अवसरे जलशक्तिमन्त्री सी.आर.पाटिलः महिलानां जीवने शौचालयस्य परिवर्तनकारीप्रभावं प्रकाशयन् शौचालयनिर्माणेन महिलानां गौरवं, सुरक्षां, गौरवं, सम्मानं च सुदृढं जातम् इति च बोधितवान्। सः अपि अवदत् यत् स्वच्छानि सुरक्षितानि च शौचालयानि प्राप्य अतिसारकारणात् वार्षिकमृत्युः निवारिता अस्ति, येन प्रतिवर्षं प्रायः त्रिलक्षबालानां प्राणाः रक्षिताः भवन्ति मन्त्रिणा टिप्पणीकृतं यत् नलजलयोजनायाः अन्तर्गतं १५ कोटिगृहेषु स्वच्छजलं प्राप्यते। जलप्रदायव्यवस्थायां किमपि अनियमितं सर्वकारः न सहते इति अपि सः अवदत्। सः अपि अवदत् यत्, उत्तमगुणवत्तायुक्तस्य जलस्य उपलब्धतां सुनिश्चित्य सर्वकारः कार्यं कुर्वन् अस्ति।

# प्रियदर्शिनी इन्दिरागान्धी



**इन्दिरा प्रियदर्शिनी गान्धी** (१९१७-१९९३) प्रयागे जाता। पठितुं सा गुरुदेवरवीन्द्रनाथ ठाकुरस्य शान्तिनिकेतन विद्यापीठम् अगच्छत्। ततः युरोपमहाद्वीपं गतवती। सा भारतस्य प्रधानमन्त्रिणी आसीत्। भारतदेशे सा एका एव महिला वित्तमन्त्रालये प्रमुखमन्त्रिपदं भूषितवती। तस्याः शासनकाले भारतदेशे प्रथमम् अण्वस्त्रपरीक्षणं कृतम्। इयं १९६६ तमात् वर्षात् १९७७ तमवर्षपर्यन्तं त्रिवारं भारतस्य प्रधानमन्त्रिणी आसीत्। तदनन्तरं १९८० तम वर्षतः १९८४ तस्याः हत्याकाण्डपर्यन्तं मन्त्री आसीत्। सा आहत्य १५ वर्षकालं प्रधानमन्त्रीस्थानं समलङ्करोत्। सा भारतस्य प्रथमा महिला प्रधानमन्त्री आसीत् इदानीमपि तत्स्थानं रिक्तमेवास्ति। एतस्याः मोहनदासगान्धीमहाभागस्य च सम्बन्धः एव नास्ति। एषा प्रभावीनेहरुकुले जाता प्रबलराजनैतिकवातावरणे वर्धिता च। मोतिलालनेहरु अस्याः पितामहः। भारतीय स्वातन्त्र्यसङ्ग्रामस्य प्रमुखः आसीत् सः। स्वतन्त्रभारतस्य प्रधानमन्त्री जवहरलालनेहरु एव अस्याः पिता। १९४१ तमे वर्षे आक्सफर्डतः.[१] भारतं प्रति आगत्य एषा भारतीयस्वातन्त्रसंग्रामे पात्रम् ऊढवती। १९५० तमे वर्षे प्रथमप्रधानमन्त्री तस्य पिता यदा आसीत् तदा एषा तस्य वैयक्तिकसहायिका भूत्वा सेवां कृतवती। १९६४ तमे वर्षे तस्याः पिता दिवङ्गतः। भारतस्य राष्ट्रपतिना एतस्याः राज्यसभासदस्यत्वं प्राप्तम्। ततः वार्ताप्रसारमन्त्रिपदवीं लालबहादूरशास्त्रीसचिवालये प्राप्तम्। सा सहस्राब्देः महिला(Woman of the Millennium) इति बी बी सी संस्थया प्रशस्तिः दत्ता आसीत् [२]। शास्त्रिमहोदयस्य निधनं तु अनिरीक्षितमासीत्। ततः इन्दिरागान्धी प्रधानमन्त्री अभूत्। एनाम् एतत्पदव्यां स्थापयितुं काङ्ग्रेसपक्षस्य अध्यक्षः कापरमहाभागस्य एव मुख्यप्रात्रमस्ति। सा जनानुरागी भूत्वा सिद्धान्तस्थापनं कृतवती। सा निर्वाचने विजयं प्राप्य स्वसामर्थ्यं प्रदर्शितवती। सा कृषिकार्यार्थं कृषिकान् प्रोत्साहितवती। १९७१ तमे वर्षे जाते भारतपाकिस्थानयोः युद्धे भारतेन निर्णायकः विजयः प्राप्तः। तदा इन्दिरा प्रधानी आसीत्। परन्तु तस्मिन् सन्दर्भे भारते असुरक्षितता सर्वत्र कोलाहलमयवातावरणं च आसीत्। तदा सा देशे आपत्कालिकीं परिस्थितिं घोषितवती। दीर्घकालीनं निरङ्कुशप्रभुत्वम् आसीत् तस्याः। अतः पूर्वं कदापि अपजयमेव न दृष्टवता कांग्रेस्पक्षेण १९७७ तमे वर्षे सार्वत्रिकनिर्वाचने पराभवः प्राप्तः।

पुनः १९८० तमे वर्षे काङ्ग्रेस्पक्षेण अधिकारः प्राप्तः। पुनः इन्दिरा एव आगतवती॥ १९८४ तमे वर्षे जून्मासे नेक्स्लेट्स् जनानां बन्धनं कर्तुम् इन्दिरा सिक्कजनानां पवित्रं स्थलं स्वर्णमन्दिरं प्रवेष्टुम् आदिदेश। एतत् सिक्कजनानां महतः क्रोधस्य कारणं जातम्। तस्मात् १९८४ तमे वर्षे अक्टोबर् मासस्य ३१ तमे दिनाङ्के तस्याः हननं कृतम्।

## प्रारम्भिकजीवनम्

इन्दिरा नेहरुगान्धी १९१७ तमे वर्षे नवेम्बर् मासे १९ दिनाङ्के पण्डितजवहरलाल नेहरु तथा कमलानेहरु दम्पत्योः पुत्रीरूपेण जन्म प्राप्नोत्। सा एकमात्रपुत्री आसीत्। नेहरु महोदयस्य काश्मीरपाण्डितकुलम्। यदा इन्दिरा जाता तदा पितामहः मोतिलाः तथा पिता जवहरलालनेहरु उभौ अपि राजकीयनेतारौ आस्ताम्। बाल्ये गृहे तीव्रराजनैतिकवातावरणम् आसीत्। एतस्याः पिता स्वात्मचरित्रे 'टुवर्डस् फ्रीडम्' इति पुस्तके एवं उल्लिखितवान् अस्ति - 'यदा अहं कारागृहे आसम् तदा आरक्षकः पुनः पुनः गृहमागत्य सर्वकारेण दापितस्य शुल्कस्य निमित्तं पीठोपकरणानि स्वीकृत्य गच्छन्ति स्म। ममपुत्री चतुर्वर्षीया एतत् दृष्ट्वा खिन्ना भूता बहु असन्तोषं प्रकटितवती। आरक्षकं प्रति अवरोधः यः दर्शितः तया तत् दर्शयति यत् दृष्टं प्रायः तस्याः मनसि आरक्षकाणां व्यवस्थायां विभिन्ना दृष्टिः एव जायते इति मम खेदः"।
इन्दिरा युवकानां युवतीनां कृते वानरसेना्-आन्दोलनं प्रारब्धवती। तत् भारतीयस्वातन्त्र्यसंग्रामे मुख्यपात्रम् आवहत। एतेन भारतीय राष्ट्रिय कांग्रेस् पक्षे सूक्ष्म समाचाराणं प्रकटनं निर्बान्धितविचाराणां प्रकटनम् इत्यादि कार्यद्वारा साहाय्यमभवत्। ध्वजपथसञ्चलनं तथा आन्दोलनानि तत्र तत्र अभवन्। शालास्यूते एव प्रमुखकार्यक्रमाणां कार्यसूची पितृगृहात् आरक्षकद्वारा एव रहसि इन्दिरा प्रेषितवती। एवमेव १९३० तमवर्षस्य क्रान्तेः एतदेव मूलस्रोतः अभवत्।

# "लौकिकन्यायकोशः"
# "नष्टाश्वदग्धरथन्यायः"



एकदा द्वयोः जनयोः पृथग् रूपेण प्रवासः आरब्धः। द्वयोः अपि पृथक् रथौ आस्ताम्। प्रवाससमये एकस्य ग्रामस्य समीपे अग्निस्फोटः जातः। तत्र एकस्य रथः दग्धः अपरस्यच अश्वाः मृताः। यस्य रथः दग्धः तस्य अश्वाः सुरक्षिताः आसन्। यस्य अश्वाश्च मृताः तस्य रथश्च सुरक्षितः आसीत्। द्वयोः गम्यस्थलम् एकमेव आसीत् इति कारणेन परस्परं रथस्य अश्वानां च योजनेन द्वावपि स्वं प्रवास अग्रे नीतवन्तौ इति काचित् कथा पतञ्जलिमहाभाष्ये दत्ता अस्ति।
एवं स्वकार्यसिद्ध्यर्थम् एकत्र आगमनं तथा स्वसमीपे वर्तमानानां वस्तूनाम् अन्येषाम् उपयोगार्थं विनियोगः एवञ्च परस्परं योग्यविनियोजनेन एककार्यसिद्धिः अति अनेन न्यायेन बोध्यते। यथा- (१) संप्रयोगे वा नष्टाश्वरथदग्धवत्। तद्यथा नष्टाश्वदग्धरथवत् संप्रयोगो भवति। तद्यथा नष्टो ममापि रथो दग्ध इव उभौ संप्रयुज्यावहे। {पतञ्जलिमहाभाष्ये स्थानेऽन्तरतमः इति सूत्रगते- १- १- ५०}
{२} नष्टाश्वदग्धरथन्यायेन कर्मणा पितृलोक इति श्रुतेः। {वेदान्तसार-रामतीर्थटीका १३}

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

# पहाड़ीगल्लां

हिमसंस्कृतवार्ताः



रवींद्र कुमार शर्मा घुमारवीं जिला बिलासपुर हि प्र 7018853800

## लागड़ तोकड़ कने फंडर

लागड़ तोकड़ कने फंडर मैहसीं रियाँ हुंदियां किसमां तिन लागड़ा तोकड़ा गे हुँदा दूध क्यू बतेहरा फंडरा गे हुंदे गोवे रे बड़े बड़े पिन
बड़ी मेहनत करने पौंदी तां मिलदा दूध क्यू भ्यागा ते संजा तिक पूरा दिन लाणे पौन्दा ख्यो बड़े प्यारा कने पाल़ने पौंदे जानवर घरा रे सारा साल खेतें कने फाटा रुल़दे माव कने प्यो



सै बी दिन थे तांजे गोहडा हुंदे थे जानवर अठ दस मिली जुली करदी थी सारा कम्म बहु कने सस्स हासदेयाँ गलांदेयाँ बीती जांदा था टैम अज्जकला साई नी बिना कम्मा ते हुई जांदी थी बस
लागड़ तोकड़ तां रखदे थे लोग दूध मिलदा रवे लगातार इक्क सुकणे लगदी थी तां दूजी हुन्दी थी सन्वार तांजे सूंदी थी तां छेरड़ा कने बौल़ी खूब खांदे थे घरा रे अजकला रिया पीढ़िया खाते तां दूध मिलदा सिर्फ बज़ार
मैहसी सूणे पर गांवां रे टब्बरा परती रोज देंदे थे दुध अज्जकला साई नी पाणी पांदे थे हुँदा था बिल्कुल शुद्ध लोग कुछ न कुछ पाई देंदे थे दूध देने वाल़े वर्तना च बरसाती घाह टोहन्देयां टोहन्देयां मारी जांदी थी बुद्ध
दुध हुँदा था बौहत बणान्दे थे खोआ दुधा ने खांदे थे पकवान दियाल़ी हुन्दी पावें बसोआ बरसाती टिप टिप लगदी थी सिरा पर डल्ला ते तांजे चुड़दा जांदा था गोवा
मिहना मिहना बणदी थी खूब खीर बच्चेयाँ री तां बणी जांदी थी तकदीर दधोनुएँ ते खाई जांदे थे कई बार मलाई कच्चा दूध पी कने बणदा था शरीर
घरा रा दुध हुँदा था बिल्कुल शुद्ध सेहती खातर सब पींदे थे इक्क इक्क गलास अज्जकला रे बच्चेयाँ साई नी नक्क मुंह थे चढान्दे दुध नी पीणा पावें खाणा दुनियां भरा रा बकवास